तिप्रमात्रभिन्नाप्यवकराविदपि नटमलप्रेद्यादा।
वीश्वरेच्छया पक्कीभवेन्नपि न ह्येषामीश्वरेच्छा ग्ति।
रिक्तं निजं किमपि जीवितमस्तीम सहजं केवल्यनेव
यत्तक्तमिरमिमत्रप्रमेयव्यतिरेकिणि मानेति।
नत्रतत्प्रमेयं दर्शयति ।। त्रयोविंशतिधा मेयं यत्का
र्यकरणात्मकम् तस्याविभागरूपैकं प्रधानं मूल
कारणम् ।। यत्कार्यकरणरूपं त्रयोविंशतिप्रकारं
यच्च तस्य मूलभूतं कारणं सर्वकार्यकरणाविभाग

© Dharmartha Trust. Digitized by eGangotri

प्र. रूपं प्रयातेनामतत्सर्वं मेयमिति सम्बन्धः योगिम
म. भि. न्त्रनदीश्वरप्रभृतीनां हि भूततन्मात्रकारणप्रधान
२२६ वशीकारयोगित्वात्सर्वमेव प्रमेयम् संसारिणा
NB मप्यनुमानागमादिदिशा प्रमेयमेवेति यत्प्रमे
यं कालादयस्तु प्रमेया अपि प्रमातर्येव लग्नाश
निप्रमातृशक्तिस्वभावत्वात्प्रमेयत्वेनेहावसरे
मायाप्रमातृव्यतिरिक्तप्रमेयप्रस्तावात्मतिगणि
ताः वस्तुतोत्र योयं प्रमातापि प्रमेय एव सन् प्रमा
त्रीक्रियमाणोक्षादिन प्रमेयताकारेणोच्यते न
न्वनयोर्विशेषो किं कार्यं किं करणमित्याशंक्याह
त्रयोदशविधावान्तरव्यापारान्तःकरणावली कार्यव
र्गश्च दशधा स्थूलसूक्ष्मत्वभेदतः॥ प्रमातुः सर्व
करणोपयोगस्तस्मात्त्रयोदशकरणानि बुद्धिरध्य
वसायसामान्यमात्ररूपा: ग्राहकग्राह्याभिमा
नरूपोऽहंकारः संकल्पादिकरणं मनः इत्यन्तःकर
णत्रिधा बुद्धेश्च बाह्याध्यवसायरूपायाश्च प्रयो
गीनि बुद्धीन्द्रियाणि पंच श्रोत्रंत्वक्चक्षुर्जिह्वा
घ्राणमिति कर्मणश्च प्रयोगीनि पंच कर्मेन्द्रिया
णि तथाहि मागोग्रहणाद्यमिति वहिर्विष
यं यतत्र पायुः पाणिः पादउतिकरणानि पततदे।

© Dharmartha Trust. Digitized by eGangotri

वान्तःप्राणेयेनक्रियतेतद्वागिन्द्रियम् तत्प्रतो
भग्नशान्त्याविश्रान्तिक्रियोपयोगुपस्थः सर्वदेह
व्यापकानिचकर्मेन्द्रियाण्यहंकारविशेषात्म।
कानि तेनच्छिन्नहस्तोवाङ्भ्यामादधानःपाणि
नैवाहन्नेवमयत् केवलंतत्तत्स्फुरद्रूपेणाहन्ति
त्वाभस्थानत्वात्संवोगलिङ्गरूपमधिष्ठानमप्य।
स्योच्यते इत्येवंकरणानित्रयोदश पंचकार्यत्वे
पप्साधारणेनकरणत्वेनव्यपदेशः स्थूलेका।
यैंपृथिवीआपःतेजोवायुःनभइतिभूतानिपंच
सूक्ष्ममेषामेवरूपंगन्धोरसोरूपंस्पर्शःशब्दइति
तत्रैकैकगुणमाकाशादिपंकैकवृद्धगुणंवेति
दर्शनभेदइहनविवेचितोनुपयोगात् तत्रस्थू
लंविभक्तमविभागस्यानुमापकमितिस्थूलो
पक्रममुक्तम् तत्रपृथिव्याद्याभासएवमिश्रीभू
यघटादिस्थलक्षणीभूताःकर्मेन्द्रियैरुपलक्षि
ताः बुद्धीन्द्रियैरालोचिताः अन्तःकरणेनसंक
ल्पिताभिमतनिश्चितरूपा विषयाविवेचिताः
कालादिभिरनुरंजिताः प्रमातरिविश्राम्यन्ती।
तितात्पर्यम् एतच्चविस्तरतस्तत्प्रधानेषुतन्त्रा
लोकसारादिषुमयानिर्णीतमिहानुपयोगात्

© Dharmartha Trust. Digitized by eGangotri

प्र. विनाशितमितिशिवम् ॥ इतिश्रीमहाचार्याभि
प्र.भि. नवगुप्तविरचितायांप्रत्यभिज्ञासूत्रविमर्शिन्या
११४ मागमाधिकारेतत्त्वनिरूपणंनामप्रथममाह्नि
114 कम् ॥१॥ ॐप्रवृत्तिष्ठितस्वभावोपिविचित्रोमातृक
ल्पनाम् स्वच्छंदलवक्रेयःप्रणयेत्तस्मैःशिवम्
एवंतत्त्वराशेर्निर्णीतेप्यनन्तर्भावेनोक्तमपिप्र
ख्येनयानिर्णीतत्वं प्रमातृतत्त्वविततस्य निर्णीते
तत्रैतन्मातृतामात्रेमादिभिर्विधात्मकः प्रश्न
स्तेविंशमाश्लोकैराह्निकान्तरेप्रस्तूयते तथाहि
प्रमातृत्रस्वरूपप्रत्यभिज्ञानमुपदिश्यतेशास्त्रे
सहिहेयमुपादेयंचस्वस्वभावंविहायपरमोपादे।
यरूपंशिवस्वभावमात्मानमभेदेनाविशञ्जीवन्ने
वमुक्तोभवतीति तच्छ्लोकेनब्रह्मादित्रयस्वरूपं
ततोपिहेयतहेयोपादेयप्रमातृतत्त्वम् ततस्त।
दुपयोगिमलस्वरूपंतत्कृतंचप्रमातृभेदंश्लोकस
प्तकेनहेयेनसमावेशस्वरूपंश्लोकपंचकेनप्रमा ५४
तुरेवमुक्तभायचमध्यात्रयेणतासांहेयोपादेयवि
भागंनिरूपयतीत्याह्निकस्यतात्पर्यम् ग्रन्थार
म्भस्तुनिरूप्यते ॥ तत्रैतन्मातृतामात्रस्थितोदेव
ताहयानत्वस्वरूपंविभक्तिमिति तद्व्याप्रति

© Dharmartha Trust. Digitized by eGangotri

पादयत्यागमव्यवहारेण ॥ अत्रापरत्वं भावाना
मनात्मत्वेनभासनात् परत्राहन्तयाच्छादात्परा
परदशा हि सा ॥ परत्वं पूर्णत्वमनन्यापेक्षाअह
मित्यपरत्वमपूर्णतान्यापेक्षेदमिति अत्र चतस्र
हये भावानां ध्यामलाध्यामलरूपाणामुभयांश
स्पर्शात्परापरत्वमिति वेद्यभावनिष्ठादशातत्त्व
स्वरूपानन्दवभासयित्मनेश्वरादिशुद्धप्रमातृ
मवेद्यवस्तुसारानन्निष्ठासंवेदनासाशुद्धविद्यात
त्प्रमातृवर्गाधिष्ठातृत्वे श्रीसदाशिवेश्वरभट्टारक
रूपेतत्तिसंक्षेपः एवमेकेषां मतेः हृमिताच्छाद(
कोयोभागस्तत्र ध्यानायानाशुद्धविद्याप्रत्ययेन मा
मन्ते योसाविदंभागप्रच्छादनीयस्तस्य यद्वभा
सनेनतत्रयानाशुद्धविद्या अन्यथा हि सर्वमेवः
केनभास्यतोमायायास्तत्राभावाद्भोवगाधरोहस्य
संगात् अतएवेयंशरोहासहिंसंयतश्चन्तोभास
यति ततःशुद्धाभासनाशुद्धविद्येति ततएवापह
रुमायाकल्पनान्महामायेयं श्रीभैरवादिगुरुभि
रुपदिष्टा तदेतदाह ॥ भेदधीरेवभावेषु कर्तुर्बोधा
त्मनोपिया मायाशक्त्येवसाविद्येत्यन्ये विद्येश्वराय
ष्या ॥ मायाप्रमातरि शून्यादिरूपेप्यनुल्लसितेवि

प्र. मात्रएवप्रमातरिकर्तरिच मतिश्चिदेकरूपेष्वपि
म.भि. भावेषुयदविद्रूपतयाभेदप्रकाशलक्षणंस्यात्।
११५ त्वंसाशुद्धविद्यामायाशक्त्यातत्सावेद्यभागेभेदप्र
115 काशनात् नचमायैवग्राहकस्यापिचिन्मात्रता।
भागेनावदविपर्यासनात् येनप्रकारेणविद्येश्व।
राभगवन्तोनन्ताद्यावर्णितेतेहिशुद्धचिन्मात्रग्रही
ताहम्भावाः स्वतस्तुभिन्नंवेद्यंपश्यन्ति यथावे
नवादिनामीश्वरः एवंग्राहकेंशनश्चेतनमद्रूपाम
रमार्थरूपेग्राह्यविपर्यासनशक्तिः शुद्धविद्यावि।
द्येश्वराणां परेशाज्ञर्भगवतःपरमशिवस्याप्रद्र
दरुद्रोपिदेवतः भिन्नप्रमेयप्रसरेब्रह्मविष्णू।
व्यवस्थितौ नत्वेतिएवंभूतेस्मिन्नागमसिद्धेषु।
स्वनुगतेचततत्स्वरूपेसतियदेतत्कालादिपंचक
वेष्टितप्रमातृतारूपंतदेवयस्यांशुद्धरूपसंस्तत्प्र
मेयज्ञानंभवति दशार्णांसंहाराख्यायांतस्याम।
पिष्टान्तदेवतात्वेनदशासंपादनेन स्वोपासक
लोकस्यतद्दशादानेनतद्दशाध्यानावेशसमापन्न ४६
स्यस्वाभिमुख्यसम्पादनेनचभगवान्परमशिव
एवेश्वरतोभजमानईश्वरएवरुद्रोभगवान्सोमा।
पापदेपिप्राणापानात्मकधर्माधर्मस्तूर्येनुदित।

© Dharmartha Trust. Digitized by eGangotri

निशादिविमुक्तमध्यज्योतीरूपप्रमातृस्वरूपस्य।
शोऽनुन्मीलिततृतीयनेत्रः भिन्नस्यतत्प्रमेयस्यप्रस
रेसम्पादनेपिष्टान्देवतान्वेभजन्वस्मात्प्रसरतेभिन्ने
प्रमेयेतत्सत्तानप्रवर्तनलक्षणेप्रसरेपिष्टान्देव
ताविस्मृः अनयोवनयोःप्रमेयप्रसररूपस्येदंनील
मित्येवंप्रकाशात्मनःप्राधान्यादहमितिप्रमातृद।
शावेशाभ्यमत्वात्तृतीयनेत्रोन्मीलनम् देवनेव
देवनम् प्रसरउत्पत्तिःसत्तानश्च यदेतन्मातृतामा
त्रमुक्तेतस्यविभागमागमिकंवसंज्ञाभेदंनिरूपय
ति ॥एवप्रमातामायान्धःसंसारीकर्मबन्धनः वि
याभिज्ञापितैश्वर्यश्चिद्घनोमुक्तउच्यते स्वात्मरूपे
ष्वभावेषुप्रमाताकथ्यतेपतिः मायातोभेदिषुक्ले
शकर्मादिकलुषःपशुः ॥मायायान्योविमोहितः
अतएवकर्मणास्वात्मनोबन्धनायभिमन्यमानए
षइतिकालादिवेष्टितः भूम्यादिप्रमातासंसरती
त्यतःसंसारी देहोपिहिस्वरूपमात्रशेषबाल्ययौ
वनादिष्वनुवर्तयन्संसरत्येव कुत्रादेश्चजन्मान्तरे
पिसंसरणेविषयान्तस्वरूपप्रकाशनशक्त्याप्रत्य।
भिज्ञापदंप्रापितमैश्वर्यंयस्यातएवशरीरादयोपि
स्वमपिसंवेदनमेवाभिमन्यमानोनएवविदेकय

© Dharmartha Trust. Digitized by eGangotri

प्र. नाम्नचिद्रूपत्वाभिव्यञ्जणाम्न्यायस्यस्वरूपंसएवनजी
त भि. त्मवन्यविरहाद्देहेपिस्थितेनमुक्तनाव्यपदेशयोग्यः
११९ पतितेस्मिंस्तुशिवपदैकज्ञनइतिकः ऊनोमुक्तः
116 मूलनपूर्वंगमात्प्रमात्रन्तरापेक्षयामुक्तएवशिव
इतिव्यवहारः यश्चासौमुक्तः सभावान्भगवद
भिमन्यमानः प्रमिमीतइति सतेषांस्वामीस्वरू
पपरमार्थसमर्पणाच्चपालकइतिरूपदिष्टः शास्त्रे
मायाप्राकृतिकृतभेदान्व्यतिरिक्तानेवमतोयदाभि
मीते तदातैरेवमेयैः पाशरूपैःपाशितइतिपशु
रुक्तः तथाहिवेद्यराशिवशादेवास्याविद्यास्मिता
रागद्वेषाभिनिवेशादयः क्लेशाधर्माधर्मादिरूपा
णिकर्माणिआशयरूपावासनाफलभोगरूपोवि
पाकइतिकालभमनन्तप्रकारैर्यतः पाशनत्वात्पशु
रित्युक्तः यदेवैनमशुद्धरूपंतदेवागमेषुत्रिविधंमल
मित्याह ॥ स्वानन्यहानिर्बोधस्यस्वानन्यस्याथवाथ
ता द्विधाणवंमलमिदंस्वस्वरूपापहारिणः भिन्न ४०
वेद्यप्रथात्रैवमायाख्यंजन्मभोगदं कर्तृत्वेबोधका
र्मेतन्मायाशक्त्यैवतत्रयम् ॥ इहतावदकर्तृरूपेणा
वच्छिन्नत्वस्यस्वरूपंतस्यापहारोनामआणवंमलं
येनामावणसंकुचितोजातः तत्रस्वरूपस्यनिमी

© Dharmartha Trust. Digitized by eGangotri

लानंसंकोचः तस्मिन्नेबोधस्वरूपेकर्तृत्वलक्षण
स्यस्वातन्त्र्यात्मनः स्वरूपान्तरस्यनिमीलनंविपर्य
योवेति उभयथाप्याणवंमलंस्वरूपापहानिरू
पमेकमेवात्रैवेतिसमाणवेमलेद्विप्रकारेस्वरूप
संकोचेकृतेभिन्नस्यवेद्यस्यप्रथनंतन्मायीयमिति
संज्ञामात्रं मायाकृतत्वेनहिमायीयनामत्रयस्या
पितत्रकर्तरिबोधरूपस्यदेहादेर्भिन्नवेद्यप्रथनेस
तिधर्माधर्मरूपंकार्मंमलं यतश्चजन्मचभोगश्च
सचनियतावधिकश्चतिजात्यायुर्भोगफलंकर्मैस्र
क्तेभवति अत्रैषांमलानांविभक्तविषयनिरूपण
स्वरूपंस्फुटीकर्तुंस्वातन्त्र्यहानिर्बोधस्येत्यस्यभाग
स्यतावद्विषयमाह ॥ शुद्धबोधात्मकत्वेपियेषांनो
त्तमकर्तृता निर्मिताःस्वात्मनोभिन्नाभर्त्रातेकर्तृ
तात्ययात् ॥ येषांचिन्मात्रमेवपरमार्थोनत्वहमिति
स्वात्मविश्रान्त्यानन्दरूपंपरमस्वातन्त्र्यंतेपरमेश्वरे
णतथानिर्मिताः स्वात्मनःसकाशाद्व्यतिरिक्ताः
अत्रहेतुः कर्तृतायाउत्तमस्वातन्त्र्यलक्षणायाअ
त्ययादभावात् परमेश्वरस्यतूत्तमस्वातन्त्र्यविशिष्ट
बोधरूपत्वमित्यभिप्रायशेषः तत्स्मादुक्तोभवति
परमेश्वरात्तेषांभिन्नत्वं अत्रोत्पन्नस्तुकथंभेदोवा

© Dharmartha Trust. Digitized by eGangotri

प्र. पस्वरूपस्यचव्यापकनित्यत्वकृतस्यचदेशकाला।
मभि. भेदस्यसमानत्वात् अन्योन्यभेदाभावेच निर्मिता
२९ त्मइति कथं बहुवचनमित्याशंकांव्यपोहति। बो
117 धादिलक्षणैक्येपि तेषामन्योन्यभिन्नता नत्वैश्व
र्येच्छाभेदेन तेच विज्ञानकेवलाः॥ इह हि सर्वज्ञाप्र
तिहतशक्तिः परमेश्वर एव नत्वात्रभूतस्तथानया
भवति नत्वन्यः कश्चित्परमार्थोस्तीत्यसकृदुक्तं त
नस्य व्यापकनित्यबोधस्वभावोप्यभेदेन निर्भासमे
इत्येवंभूतेनैश्वरेच्छयाभेदेन विशेषणेनैषां शरी
रादिशून्यात्मप्रमातृपदेऽवतीर्णानां बोधत्वनित्यत्ववि
भुत्वादिधर्मजातस्यैक्येप्यन्योन्यभेदः ते च शास्त्रे वि।
ज्ञानकेवला उक्ताः तत्र विज्ञानकेवलो मलैकयुक्त
इत्यादौ विज्ञानं बोधात्मकं रूपं केवलं स्वातन्त्र्यरहित
मेषामिति एवं स्वातन्त्र्यहानिर्बोधस्याप्यस्य विज्ञाना
कलविषयतामुक्ता स्वातन्त्र्यस्याप्यबोधतन्मयत्वमंशां
विषप्रदर्शनेन स्पष्टयति॥ शून्याद्यबोधरूपास्तु। ४८
कर्तारः प्रलयाकलाः तेषां कार्मो मलोऽप्यस्ति मा।
यीयस्तु विकल्पितः॥ शून्ये जडत्वादबोधरूपे एव य
दिवा प्राणे तु देहे वा येषामहमिति चमत्कारयोगात्क
र्तृत्वं ते प्रलयेन कृताप्रकलाः कलान्तत्वोपलक्षित

© Dharmartha Trust. Digitized by eGangotri

करणकार्यरहिता अबोधरूपाः कर्त्तारश्च मल।
यावत्पिहितेन तथाभूताः उत्तरकालं तु कार्यकारण
सम्बन्धायैव भवन्ति एतत्पर्यन्तं केवलमुक्तरूपश्चा
णवमलो यावत्कर्मापि वासनासंस्काररूपेण
धर्माधर्मात्मास्त्येव यद्येवं भिन्नवेद्यप्रथा एषां।
स्यात् सत्यं संवेद्यरूपे सुषुप्तपदे अवेद्यत्वं न।
भवति तेन मायीयो मल एषां विकसितः व्यवस्थि
तविषयत्वेन तथाहि केऽपि भूम्यादिभागविश्रा।
न्ता गाढनिद्राजडीकृताः अपवेद्यसुषुप्तपदभा
जः अन्ये तु अश्वादिनिष्ठाः सुखदुःखावशेषसा
मान्यात्मकभिन्नवेद्यसंवेदनयोगिनः सवेद्यसौ।
षुप्तपदलीनाः स्थूलदेहेन्द्रियात्मककार्यकरण
वियोगरूपत्वेन प्रलयाकललक्षणं सर्वेषां तत्स
एवं स्वातन्त्र्यस्याप्यबोधतेमयमंशः स्फुटीकृतः।
प्रसङ्गाच्च कर्ममलस्य विषयो दर्शितः मायामल
स्य च पातिकत्वमुक्तं अधुना पुनराणवकार्मम
लद्वयाभावेऽपि शुद्धोऽस्ति मायाख्यस्य मलस्य विष
यइति दर्शयति बोधानामपि कर्तृत्वजुषां का।
र्ममलत्वेऽपि भिन्नवेद्यप्रथां मायामलं विशेषरा
स्थिते।। ये चिन्मात्रमेवात्मतया प्रथयन्ति अहमिति

प्र॰ चमत्कारोल्लासात्कर्तारस्तत एव सर्वज्ञः सर्वक
स भि॰ र्तारश्चते विद्येश्वराः किंतु तत्र करणभुवनादि
११८ यदेषां वैचित्र्यं तथा कार्यं न प्रतिभाति ननु चिद्रूप
118 त्वस्याभिन्नमेव सद्विमलविद्येश्वराणां मायाप्र
मलयोगः अथ मलत्रयस्यापि योगपद्येन यो
विषयत्वं दर्शयितुमाह ॥ देवादीनां च सर्वेषां भवि
नां त्रिविधं मलम् तत्रापि कार्ममेवैकं मुख्यं संसार
कारणम् ॥ इह विद्येश्वरा विज्ञानाकलास्तावन्न भ
विनः मायान्तःकाधःपतिक्रमणात् प्रलयाकलाश्च
पि किंचित्कालमविद्यमानभवाः ये त्वेते मायान्त
र्वान्तरालविपरिवर्तिनो देवादयः स्थावरान्ताश्चतु
र्दशविधाः शास्त्रेषु परिगणितास्ते सर्वे भविनः
संसारिणः तेषां च त्रयोपि युगपन्मलाः तत्र मल
त्रयमध्ये कतमो मलः संसरणमेषां सम्पादयेत्
आह तत्रापि तेषु त्रिष्वपि सत्सु कार्मं मलं मुख्यं।
तथा सन्निपमसंसरणे कारणं यथोक्तं कर्म त
च्छरीराणि विषयः करणानि चेति तत्र करण
विषयसम्बन्धप्रवर्तमानो भविष्णुरेवमनवर
तं प्रबन्धेनावर्तमानः संसरणमुच्यते अणव
मायामलेनतथापि न तत्कारणं संसारे तथापि

कार्मेण विनाणो देहादिविचित्रभावाभिनिवर्तन
ण क्रिम्भूमो विज्ञानाकलादिष्विति सुत्रे कार्ममेव।
मलं संसारकारणं संसारेनत्रनत्रशास्त्रे गण्यते
अनएवतदुपत्तये ह्नेहूनस्तावदंसंसरणसोपान
पदवन्धश्माशयेन कर्मेठ्याभिमानपरिहानिरे
वयत्वत: सांख्यपुराणभारतादिशास्त्रेषुपदिश्य
ते एवं मलत्रयस्यैकैकभेदैस्त्रिभिर्द्विभेदैस्त्रिभिस्त्रि
भेदेनेकेनेति समस्तशामानारउतिष्ठन्ति तथाचशा
स्त्रेशिवादिसकलान्ताः शक्तिमन्तः समेत्कंनेत्रा
यावान्तरभेदेन विकल्पसमुच्चयभेदेनवानन्तप्रका
रत्वमिति अस्यच मलत्रयस्योद्भवतिरोभावभेदा
त्संसारिणांप्रकारद्वयमिति निदर्शयति कलोद्दलि
तेमेनस्वचिन्नलंकर्त्रेनामयम् अविहूपस्यसूक्ष्मा
देर्भितंगुणानथास्थितम् ॥ सुखंत्वकर्त्रेनाथास्वबो
धस्यच चिदात्मनः सूक्ष्मादेशेनगुणेज्ञानेनसमावे।
शलक्षणाम् ॥ पतक्षेतिपञ्चिदशादीनां भवितांवै
नमेकर्तृतां शस्यप्रधानात्मलेनसंविभागस्पतिम
ज्ञिनत्वाकर्त्रेनामयं चिहूपस्यनत्वस्यानत्यकला
त्वेनपरमेश्वरशक्त्यात्मनानवेनोपोद्दलितं अत्रमा
गिनं मलेनमप्ताकृतं सुहोप्यितं सूक्ष्मादेर्देहपर्य

© Dharmartha Trust. Digitized by eGangotri

प्र. त्मस्य मायाप्रमातुः सम्बन्धितद्गुणत्वेनाप्रधानत्वे
स.भि. न स्थितं यतो भिन्नमिदन्तापन्नदेहादिप्रमातृप्रमे
११९ यभागनिमग्नत्वात्प्रमेयम् योगीन्द्रः यः स्वकीय
119 लक्षितो यः सर्वरहितः सोहमिति हि इदन्तैवात्म
लीनाहंभावासंसारिणां परिस्फुरति सेयं जाग्रत्स्व
प्नसुषुप्तरूपा संसारावस्था यदात्मकगुरूपदेशादि।
दिशा तेनैवाहम्भावेन स्वातन्त्र्यात्मना व्यापकत्वनि
त्यत्वादिधर्मपरामर्शात्मनि विद्यमानानन्तः शून्यादेः
प्रमेयाद्वन्मज्जैवास्यते तदान्तर्यामीनावस्थापदापि
परामृष्टतथाभूतवैभवनित्यत्वैश्वर्यादिधर्मसम्भेदे
नैवाहंभावेन शून्यादिदेहधात्वन्तं सिद्धरसयोगेन वि
ध्यते तदा स्यात्तुर्यदशायां तदपि प्रमीयमानाशज्ञनी।
वसेयं त्वण्यपि जीवन्मुक्तावस्था समावेशरसकंपा
हे सम्यगावेशनमेव हितत्रतत्प्रधानं तत्सिद्धये
गुरूपदेशान्तराणि यथा गीतम् मय्यावेश्य मनो ये
मां नित्ययुक्ता उपासते तेषां सततयुक्तानां योग
ते मे वहाम्यहमिति श्रद्धावेशार्पितं चित्तमित्या
दिसमावेशपल्लवा एव च प्रसिद्धदेहादिप्रमातृ
भागप्रह्वीभावभावनानुभागिनः परमेश्वरस्तु
तिप्रणामपूजाध्यानसमाधिप्रभृतयः कर्मप्रपंचाः

© Dharmartha Trust. Digitized by eGangotri

यद्गीतम् ग्रन्थ्यासेप्यसमर्थः तत्तत्कर्म परमोभ
वेति देहपाते तु परमेश्वररूपैकरस इति कः क्रम।
कथं समाविशेत् तदेतदा यत्नतः कर्तव्यताः उ
त्थानं तत्रान्तरीयकस्य स्वमादेशेणभावः तस्मि
न्नाणि हृपे उणिभते स्वातन्त्र्यस्यापबोधते निम
तव्यापारस्यापहस्तनाश्चिन्नो योपरोध्यात्मभागो
बोधलक्षणो मलेन मण्कुतो भूतस्याप्यधनोन्मग्रत्व
न मुख्यत्वं यत्नकर्तव्यतामुख्यत्वं मुन्मग्नताद
दमेव ज्ञानमत्तानात्मकमलश्रतिपन्नत्वात् तदे
तन्मुख्यत्वं समावेशस्य लक्षणं येन देहस्थितोपि
पतितितिमुक्त इति शास्त्रेषूक्तः न त्वेवं पत्युः स।
मावेशात्मिकात्र यं तदर्जीतरूपाभवत्तदशाप
शास्त्र कथं स्तुमस्व हृजाग्रद्दशाभेदश्चागमेषु
क्तः समाशंकास्तुमस्वरूपमेव तावद्दर्शयति श्लोकद्व
येन ॥ भूमेन्द्रियाद्यभावात्मस्वरूपाकर्तृतापदे
श्चकृतात्रूपसंस्कारमात्रिणात्तेय सूक्ष्मता ॥ सा
त्ताणमान्तरीहतिः प्राणादिष्वेरकासना जीव
नाख्याप्यवाप्राणो हन्ताभूर्यं सूक्ष्मकात्मिका ॥ ताव
न्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमम् सवेद्यम
पवेद्यं चमायामलयुक्तापुनम् ॥ इह चित्तत्वस्व

© Dharmartha Trust. Digitized by eGangotri

प्र. स्वरूपमाच्छादयन्तीत्यरूपेणेत्यादिनादेहान्तेन
प्र.भि. घटादिनावभासने एकमेवचेदंस्थानन्नाविज्ञ
१२० म्भितंनत्वत्रवान्तवः क्रमोवाभेदोवानचापित
120 स्थानान्तरक्रमस्यभेदस्यभासने तदेवंस्थितेय
थ्रिनत्वस्यस्वरूपाच्छादनभागः सर्वोत्तरभागा
न्तरासंकीर्णोयदाविश्राम्यति तदत्वदयाहान
त्रंधंसहाशलयश्चनदनादराहानिद्रासमाधिम्
क्रोडाविवतत्रैववाहन्तारूपंकर्तृतापाः पदंपरा
मर्शोस्फुटतादृरूपात्मतासंस्कारेणशुद्धेनवेद्यप
दवीमप्राप्तेनयुक्तोभवति तदासैवावस्थानेमेव
परामर्शशेषानपेक्षिन निषेध्यत्वआदिविषय
सस्पृष्टपरामर्शसम्भेदाप्यवश्यंभाविनिषेध्य
योगादकिंचनोऽहमिमेवंभूतपरामर्शवत्स्वीकृ
तसामान्याकारनिषेध्यात्मकसंस्कारशेषीकृ
तज्ञेयरूपाशून्यमुच्यते तथाविधेऽत्यादीनांदे
हादिनीलादीनामभावरूपेशून्यत्वमुच्यते यत ५८
स्तत्तेषानांशून्यताभावरूपतासंस्कारशेषता रथ
मेवहिसर्वत्राभावः ततसतांसर्वत्रविनाशः त
त्रैवशून्येप्रमातरिसमवेता प्राणापानसमानोदा
नात्मकवायुचक्रेप्रेरणात्मिकाशक्तिःसाचविद्या

© Dharmartha Trust. Digitized by eGangotri

कलयोः प्रपंचभूतोयोक्रमेणाबुद्धीन्द्रियकर्मेन्द्रि
यवर्गौ तयोरान्तरीवृत्तिः बाह्याहितयोः शब्दा
द्यालोचनशब्दादिव्यञ्जनस्थानाभिहननादिका
वृत्तिः तदुक्तं सामान्यकरणवृत्तिः प्राणाद्यावा
यवः पंचेति एवंसूत्रप्रवाहन्यात्तैवक्रोद्दलिता
जीवनमिति सम्भूयपवजीवः संसरति यदिदे
न्द्रियशक्तीनामेवयान्तरीसाधारणप्राणनात्मि
काप्राणशब्दवाच्याप्राणादिमारुतविशेषभेद।
णामपीसैवाह मिसधिशय्यमानाजीवनंतदा
प्राणएवजीवः संसारीमयवसूत्रः प्राणस्थपुर्यष्ट
कशब्दवाच्यः प्राणादिपंचकंबुद्धीन्द्रियवर्गःक
र्मेन्द्रियगणोनिश्चियात्मिकाचधीर्यतोव्यज्यते
तन्मात्रपंचकंमनोऽहंबुद्धिपरमष्टमे तन्मात्रोदयरू
पेणमनोऽहंबुद्धीतिभूमिरापइतिचवदतः एवं
यदुभयात्मकंतावमेवबुद्धेयाविश्रान्तिस्तस्यास
मोयदहन्तायाः स्वभावबोधलक्षणंभावरू
पंकर्मवक्रियास्वभावंतत्सौषुप्तंमलेनहिप्रमा।
नास्मः कल्पान्तस्मस्वाप्नतन्निमज्जनेनस्वरू
पस्यभावःकर्मैवतिततत्रसुप्तेसौषुप्तेनकिंचि
द्व्यतिरिक्तंवेद्यमिति मायीयमलाभावादपवे

© Dharmartha Trust. Digitized by eGangotri

प्र.
मवि.
१२१
17

येनतत् प्राणस्तम्भेनस्पर्शकृतस्यस्खलङ्ग:स्वादेर्भो
वान्मायायाश्चमलिनमलभित्तिसंवेद्यंतत् एवंगा।
त्यागादस्तम्भसहितयवत्सलयोपिमन्तव्यः स
परंदेहादिप्रबंधस्यानुदयकृतश्चिरनरकालः स्व
प्नेतुदेहाद्यनादरकृतमचिरकालंवेतिविशेषः
तत्रापिश्रमकृतंनिद्राख्यदोषकृतंमूर्छादव्य
कृतंमदोन्मादादिस्वातन्त्र्यकृतंसमाधिरित्यवान्त
रभेदाः केचित्तुसमाधिरूपंसंवेद्यमप्यपवेद्य।
मितिप्रपन्नाः १५ नन्वेवंस्फुटवेद्यपदविनिर्मुक्ता
स्तम्भावस्थास्तत्स्वप्नजाग्रद्दशयोस्तत्स्फुटवेद्या
भासयोगिनोः कोभेदइत्याशंक्यश्लोकद्वयेनभे
दमाह।। मनोमात्रपथेप्यक्षविषयत्वेनविभ्रमा
त् स्पष्टावभासाभावानांसृष्टिः स्वप्नपदंमतम्
सर्वाक्षगोचरत्वेनयात्तुबाह्यतयास्थिरा सृष्टिः
साधारणीसर्वप्रमातृणांसजागरः।। बाह्येन्द्रि
याधिष्ठानानांचक्षुर्गोलकादीनांनिमीलिता।
निनिद्रायमाणस्यलक्ष्यन्ते नचतेषुनिमीलितेषु
बाह्येन्द्रियग्रहणव्यापारोदृष्टः तेनशुद्धएवमनो
मार्गेरूपस्पर्शादयोभावाः ग्रहणग्रहणासम्भविते
नस्पष्टेनवपुषाभासनयोग्याः परमेश्वरेणसृ

© Dharmartha Trust. Digitized by eGangotri

क्तेनत्वरूपेणानिष्टस्येव दर्शनादिष्टस्यापि देशकाला
न्तरादियोगेन अत एव मनोमात्रस्थितत्वादेवन
प्रमात्रन्तरसाधारणीयं सृष्टिः यत्तु नत्रवाद्येन्द्रि
यविषयत्वं प्रमान्तरसाधारण्यं च चकास्ति तत्र
घटपियावज्ज्ञाति तावत्स्त्येव तथा पुनरकालं प्रबु
द्धस्य न नश्यति परामर्शेन तद्रूपनिर्मूलत्वमेताव
भातीति परामर्शेन तद्रूपनिर्मूलं भ्रान्तम् या
निहि प्रमात्रन्तराणि स्वप्नेन्द्रियाणि च भान्तिता
नि प्रबोधकालभाविभिरेव वचनैरभिज्ञास्तीति निश्च
यः प्रबोधकाले च न तथैति निश्चयानुग्रहनिरपह्न
नैवनेनोभयमपि भ्रान्तमुच्यते भ्रान्तत्वमेव चास्य
येयमिन्द्रियाविषयत्वे नैवासाधारणत्वमाविर्भ
विभ्रमेणास्य यमिति स्वकण्ठेन तज्ज्ञायन्त्वनियो
गिधर्मो निरूपणावसरेपि नदर्शितम् एवंभूता
याः सृष्टेः सापरेषोः स्वप्नसमयेनावस्त्वभ्रपदेस्व
प्नकाले विषयइति नथाभूतविषयत्वं प्रमात्रन्त
परेषोः स्वभावस्य निपातवन् प्रत्यग्रहणं वास्येन्द्रि
यद्वाकस्यापत्तत्वं यत्नवाद्यान्तरादिविष।
यं सर्वप्रमात्रसाधारणत्वं च निश्चयानुग्रहस्यावाधा
विरहितयापारमार्थिकत्वेन च चकास्ति ततएवास्य

© Dharmartha Trust. Digitized by eGangotri

प्र. यं विषयस्य सा सृष्टिः पशोर्जागरः तद्विषयं प्रमा
स. वि. तृत्वं पशोर्जागरावस्थेति यावत् यावस्थात्र हन्ति।
१२१ स्थैर्यं निश्चयस्य च कालान्तिकावज्जागरः तन्न्यप
व निश्चयात्र हन्ति निर्मूलनात्स्वप्नरमेव भासमा
रणाहृल्हृनां स्वप्नेपि दीर्घं यत्र स्वप्नान्तरं सतत दृपे।
तया जाग्रदेव जाग्रदभिमतमपि वा दीर्घदीर्घका
लान्तरे निश्चयानुवृत्ति विरोधाज्जाग्रदन्तरापेक्षया
स्वप्नप्रवेति मन्तव्यम् आसां तिसृणां हेयत्वप्रद
र्शनेन तुर्यावस्थानः प्रसरति उपादेयत्वं स्वयति
हेयात्रयीये प्राणादेः प्राधान्यात्कर्तृत्वाग्रहो तद्रा
गोपचयप्रायसुखदुःखादियोगतः ॥ यत्रायं प्र
माता मा गोपादानतदिच्छाप्रयत्नादिकं परिक्लेश
पश्यति तदेवास्य हेयतया भाति सर्वास्य सुख
दुःखयोगवैचित्र्येणैव हृतेतः तत्सेतदवस्थात्रयेस
म्भवति यतः कर्तृताऽऽरूपं स्वात्मविश्रान्त्यानन्दो।
न्मुखलक्षणमानन्दैकघनं यस्मिन्नयं वपुस्तदा ५१
प्राणादिष्वनिमूलस्य धर्यं प्रकदेहादिभूमिष्वगुणता
मभ्येति तदा तस्मिन्गुणीभूते प्राणादेः प्राधान्यस्फु
रति तथा च तस्य चिद्रूपस्य यथा यथा ह्रानिः तथा
तथा दुःखोपचयः यथा यथा किंचिदुन्मज्जनं त

© Dharmartha Trust. Digitized by eGangotri

ष्यात्तथात्स्वरूपोपचयः तथाहि बुभुक्षाकाले प्राण
स्यैवोद्रेकाद्दुःखं दृष्टमेतत्स्वरूपाभावाद्देहस्योद्रेकात्सु
खं एवं श्रान्तस्य मर्दने मर्दने देहप्राधान्यात्प्राधान्ये
मत्त्वे यत्तु समावेशनत्वन्तु स्वपनकाले दुः
खानुदय एव यदाहुर्दुर्बलोऽपि तदाक्रम्येति प्राक्स्था
दयेहु भुक्तो चेति एवं प्राणादेः प्राधान्ये कर्तृतायाः
गुणभावे सुखदुःखवैचित्र्यदर्शनयोगः प्रयासम्भू
मिरिति जाग्रत्स्वप्नसुषुप्ते प्राणादिप्राधान्ये कर्तृ
तान्यगभावस्थास्तीति त्रयमेव हेयं कर्तृताप्राधान्यो
न्मीषान्तन्तर्यद्रूपास्थितिः तत्र स्थैर्यात्मकतुर्यातीत
दशान्तरूपादेयमेकरसानन्दघनस्वभावलाभेऽ
पादित्वाजिह्मा सा चैव प्राणपरिश्रमप्रशमादिति ता
त्पर्यम् ननु प्राणादिप्राधान्ये हेयता यत्कारणत्व
कं तथैव जाग्रदादित्रयमेव न हि तुर्यादेस्तदभावात्त
त्समावेशे सुख्यानां नमतिरिति शंकां परिहरति श्लो
कद्वयेन ॥ प्राणापानमयः प्राणः प्रत्येकं सुप्तजा
ग्रतोः तच्छेदात्मा समानाख्यः सौषुप्ते विषुवत्स्थित
मध्योर्ध्वगाम्युदानाख्यस्तुर्यगोऽज्ज्वलनभुज्जयः विश्वा
नाकलमनेशो व्यानो विश्वात्मकः परः ॥ प्राणर
ति प्राणना रूपा जीवनस्वभावा येयं विरूपस्य स्थितिः

© Dharmartha Trust. Digitized by eGangotri

सातावत्सामान्यपरिस्पन्दरूपादेहप्राणादेर्वेदनं।
स वेद्यमानतासम्पादनात्मिकाहिमितिस्ता
नन्नारोपसारासनीविकल्परूपपरामर्शमयीसैव
प्राणादिविशेषात्मतापत्तिरूपतांभजतेतत्रकिंवि
उह्रनीकृचित्पतन्तीयप्रश्वासनिःश्वासरूपाक्रमेण
प्राणत्वमपानत्वंचविशेषंदर्शयति नहिदंविशेष
द्वयंजाग्रतिनावस्फुटमेवदेहात्मस्पन्दविषयेविश्रा
न्तः ततोपिदेहस्पन्दादावभ्यन्तरेपववेद्येविश्रमणा
त् स्वप्नेपितद्द्वयमस्त्येवस्वप्नोहिप्राणापानैतोनि
र्गमप्रवेशात्मतोस्फुटमेवपरेणलक्ष्यते स्वयम
पिचवेद्यसम्पादनाभोगोपादानरूपाख्यातिःसंवे
द्यतएव तेनप्राणनाप्राणापानविशेषद्वयमपी
जाग्रतितथास्वप्नेस्वप्नेस्वप्नः नरेवततपदास्वतरं
पुष्टंभवति तदासुषुप्तःसमानातस्पंदेसौषुप्तंप
दंतद्विविधमपिसमानरूपंविशेषंप्राणीयंस्वीक
रोति सवेद्येनावस्थसुषुप्ते यद्यपिप्राणापानस्पन्दो
लक्ष्यते तथापितयोर्मध्येयाविश्रान्तिहृदयसद
नेतिरिन्द्रियप्रदेशेनदेहसुखेनतःसौषुप्तमितितत्र।
प्राणापानयोर्यच्छेदोविश्रान्तिः कंचित्कालंतदात्मा
सकलरसादिवर्गस्याधोधःपरतिर्यक्तसमानीकरण

© Dharmartha Trust. Digitized by eGangotri

व्यापारात्मानन्तयवस्तस्य विकासादानाङ्कुरूपीन-
ज्ञरणकारी समानो दिनरात्रिरूपो यः प्राणापान
योः केचित्कालं साम्याद्धि च्छेदास्य विषुवत्कालत
त्वः विषुवाभिः समानीकरणमर्हतीति तदर्ह
मितिवति: उपमानवतेरेववाच्यमत्र गुहनोवि
वतइति प्रयोगात् तद्विमायसिद्धं तवावतिके
विशेषवाक्ष्निरात्रिनहूनाधिकत्वलक्षणं स्यवति
प्रेरयत्यविरतमिति प्राणरि विषुवत् तत्र च विषुव
ति विच्छिद्यमानस्य प्राणापानस्य संस्काररूपतया
सद्भावः सैव हि विच्छेदो न तु सर्वात्मना नाशोऽस्ती
त्युक्तमसकृत् ततश्च हानादानयोर्बीजरूपतामस
भ्युपेरयति च सर्वः प्रलयाकलान्तः पशुवर्गः यदा
तु साम्प्राणनहृन्निर्वासरहितिणमार्गौ रिवलीभावय
त्तीमध्यरूपेणोर्ध्वं न प्रवहति तदा तत्प्रवहनेमक।
त्नस्याभेदस्या ऽभेदसारतादानलक्षणं विलापनमा
णानस्यैव सर्पिषो विद्रवती उदानहृत्ति: विज्ञाना।
कलादारभ्य सदाशिवान्ते सा चतुर्थात्मिकादशामा
योर्ध्वे हि विज्ञानाकल इति ततः प्रभृति भेदगलने
प्रवर्तते विलीने तु भेदे सर्ववेद्यराशिरूपतत्त्वभूतभव
नवर्गात्मकदेहव्यापनरूपेण हृत्तिः व्यानरूपा विश्वा

© Dharmartha Trust. Digitized by eGangotri

प्र. त्मकपरमशिवोचितानर्घ्यानीनरूपाप्राणापवक्षमा
मभि. नाप्राणापानरूपः समानरूपाउदानरूपोव्यानरू
१२४ पश्चेति सामानाधिकरण्याद्विज्ञानाकलस्यासो
१२५ मन्त्रस्यासौ वर्गापेतयाईशस्यसदाशिवेश्वररूप
तया सावितिमउदानः एतदुक्तं भवति यद्यपि
नर्यनदनीनयोरप्यस्तिप्राणाना अमयाजीवा
त्वस्यवुभ्यानस्यवानुपपत्तेः तथापिभेदोपसंहा
रेणाभेदविश्रान्तिप्राधान्यादनयोरीशयोः सुखदुः
खादिवैचित्र्ययोगादेकघनत्वात्मविश्रान्त्यात्म
कपरमानन्दमयत्वेनोपादेयत्वमेव सुषुमादेत्वसंका
रूपत्वस्फुटवेद्योल्लासस्फुटवेद्यावभासरूपस्यभेद
स्यविद्यमानत्वादस्तिसुखदुःखादिवैचित्र्यमिति
हेयत्वमेवेतिष्ठकमुक्तंहेयादुपीयमित्यादि भगवत
श्चविश्वशरीरस्यप्राणापानसमानोदानव्यानरूप
नैवसकलगनोल्लासप्रवेशप्रलयाकलविज्ञाना
कलादिवर्गसदाशिवरूपतेत्यनेनदर्शितम् यथो ५५
क्तं षट्त्रिंशदात्मकं विश्वं शम्भोः प्राणादिपञ्चकपर
तीतिशिवमोम् ॥ श्रादिनः १२२ इतिश्रीमदाचार्या
भिनवगुप्तविरचितायांप्रत्यभिज्ञासूत्रविमर्शिन्यां
आगमाधिकारेप्रमातृतत्त्वनिरूपणंनामद्वितीय

© Dharmartha Trust. Digitized by eGangotri

मात्रिकम् आहितः १४ अनन्तमानमेयादि
वैचित्र्याभेदशालिनम् आत्मानं यः प्रपश्यते भ
क्तानां तेन स्मृतः शिवम् ॥ एवं स्वसंवेदनोपपन्ना
गमसिद्धं महेश्वरस्वरूपं यदधिकारत्रयेणावितत
निर्णीतं तद्देवसंक्षेपेणाशिष्यबुद्धिनिवेश
यितुमागमार्थसंग्रहश्लोकाष्टकदशकेन प्रद
र्शयति स्वात्मैव सर्वजन्तूनामित्यादिनामलेना
प्यादिनमित्यन्तेनैकादशकेन तत्र श्लोकेन पार
मार्थिकं रूपमुक्त्वा श्लोकनवकेन बन्धस्वरूपं प्रमा
दप्रमेयतत्त्वदर्शनादिना समकेन अन्यमभिताम
कं मोक्षं ततं श्लोकेनोपसंहारं दर्शयतीति तात्प
र्यम् अस्यार्थस्तु निरूप्यते ॥ स्वात्मैव सर्वजन्तू
नामेक एव महेश्वरः विश्वरूपोऽहमिदमित्यख
ण्डामर्शबृंहितः ॥ इहजडाजडावभासतनन्तिमध्या
एव भवन्ति इदमिति हि जडरूपामर्शोऽहमिति सं
वित्परामर्शो एव विश्राम्यति तत्र जडानिरात्म
नः इति जन्तव एव जीवाः सात्मानः तेषां च महेश्व
र एव स्वात्मा आत्मा स एव च महेश्वरो न त्वमः कश्चित्
यतः संवित्स्वभावोऽसौ संविदश्च न देशेन न काले
न न स्वरूपेणाकोऽपि भेदः कामं देहप्राणाद्युपाद

प्र॰ योभियुक्तोनेतज्जडपश्यास्येननिमग्नापवे
प्र.भि॰ नैकएवचिदात्मास्वातन्त्र्येणस्वात्मनियतो
१२५ विश्वरूपंभासयति ततोमहेश्वरोऽनन्तमीनामि
125 दन्त्याहन्ता परानन्दसुखस्वात्मनिविश्रान्तिरू
पोहंविमर्शपरिपूर्णतएवसर्वज्ञसर्वकर्तृत्वे
नास्ययत्नोपयोगेविविक्तबुद्धिकर्मेन्द्रियविष
येन्द्रियग्रामात्मकत्वेनैकस्यैवात्मनस्तथा
इन्द्रियस्थानीयरूपत्वेनसहस्रविषयस्यभा
वराशेर्यज्ज्ञानंकरणंचनदेकत्रचिदात्मनीति
ननुयद्येकएवायंमहेश्वररूपआत्माकस्तर्हिब
न्धोयदर्थमोचनायायमुद्यमइत्याशंक्याह ॥
तत्स्वसृष्टेदंभागेबुद्ध्यादिग्राहकात्मना अहं
कारपरामर्शपदंनीतमनेनतत् ॥ तत्रैवंस्वात्म
निमहेश्वरेस्थितेनतस्मिन्नेवप्रकाशरूपेस्वात्मदर्प
णेतेनैवमहेश्वरेणस्वातन्त्र्याद्भावतस्सृष्टःसंको
चपरःसस्इदम्भागस्तन्मध्येयदेतद्बुद्धिप्राणदे
हरूपमिदन्तयावेद्यंतद्भिन्नस्यवेद्यस्यग्राहकत
यासमुचितमिदम्भावाभिभवाप्रभविष्णुनाकृ
तेकेनापूर्णेनाहम्भावेनपरामर्शेनभासमानंच
कास्ति अहंदेवदत्तोहंचैत्रइति नन्वेवमप्यस्तुत

© Dharmartha Trust. Digitized by eGangotri

व्यापिकस्य बन्धः ईश्वरस्येति को हि को मोक्षितेदे।
तस्य निरुत्तेमाह ॥ स्वस्वरूपापरिज्ञानमयोनेकः पु
मान्मतः तत्र सृष्टौ क्रियानन्दो भोगोऽतः स्वतन्त्रात्मकः
स्तस्य परमार्थेनो न कश्चित् बन्धः केवलं स्वस्मादेव।
स्वास्वान व्याप्यरास्वात्मानं संकुचितमवभासयति
स एव तदा स्वस्य स्फुरणस्य रूपस्य यदपविज्ञानं भास
मानत्वेप्यप्यामर्शरूपं तदेव कारणत्वेन प्रक्रान्ते य
स्य स्फुरणत्वाख्यातिमायातन्वः पुरुष उच्यते अतएव।
वानेकः तत्र देहप्राणबुद्धिविशेषसंकोचग्रहणात्
सवपुमान्भोक्तासम्बन्धं भोगलक्षणमनुभवति भो
गश्चनामयो कल्पितो क्रियानन्दो कल्पिता क्रियाऽतः
त्वेच्छो हि प्रकाशाप्रकाशवोचलंस्वरूपं तः स्वमुच्यते
प्रकाशरूपेच सत्त्वं स्वत्वेन मस्त्वप्रकाशरूपो मध्येवि
भ्रमः प्रलयस्थानीयः ननु स्फुटविमनेन किंस्वव
स्थेयं किंच संग्राह्यमित्याह ॥ स्वांगरूपेषु भावेषु पा।
मुक्तानं क्रियाचया मायातृतीयेनेपदपशोः सर्वर
जस्तमः ॥ विश्वरूपस्य भगवतः स्वरूपभूतपदवि।
स्तत्रयः प्रकाशोपश्च विमर्शस्तेनावज्ञानं क्रियेस्वरू
पपरामर्शोपरिमाणेनैव यद्धि भिन्नतयापि विमर्श
नेस्वरूपपरामर्शोपवविश्रान्तमहमिदमिति स

© Dharmartha Trust. Digitized by eGangotri

प्र०
मभि
१२९

दाशिवेश्वरपरमार्थंसाभगवतोमायाशक्तिःस्वा
पनात्मिकाःशक्तयोभगवतिनैसर्गिकोहष्टाःस्व
रूपापरिज्ञानेनभिन्नेषुभावेषुज्ञानेक्रियाशुद्धमे
वभिन्नत्वेप्रकाशविमर्शोभयमिति पशोःप्रका
शःप्रकाशाप्रकाशावप्रकाशश्चेतिक्रमेणसु।
खदुःखमोहलक्षणानिसत्त्वरजस्तमांसि।नन्वे
वंसत्यप्यपरमेश्वरस्यज्ञानक्रियामायाव्यतिरे
किण्यःशक्तयःप्रसज्यन्ते नह्यस्यपशोःसत्त्वरजस्तमां
सिप्रसज्यन्ते व्यतिरिक्तानिचतानिगुणत्वाद्धएव
न्तेनदेतत्कथ्यमितिसंशयंशमयति॥भेदस्थितेः
शक्तिमतःशक्तित्वेनामदिश्यते पशोःगुणानांक
रणकार्यत्वपरिणामिनाम्॥सत्यमेवंस्याद्यदिभे
दग्रहोनभवेत् भेदव्यवहारस्त्वयंविचार्यते नचव
संकुचितचिन्मात्रस्वभावःपुरुषः नास्यनैसर्गिकं
भावविषयंप्रकाशनादिरूपंसंवेदनस्यसंगात्
प्रमितत्वसमन्वयकृतेननश्चनतस्मात्पशोःशक्ति।
मत्त्वेनयोक्तमानाद्भेदेनयत एतानिसत्त्वादीनित
तःशक्तयोव्यतिरेकमुक्ताःइतिनोच्यन्ते किंरूपक
रणत्वाद्गुणाइत्युच्यन्ते नतुपुरुषात्किमितितेभे
देनोच्यन्ते उच्यते सुखदुःखमोहपरिणामरूपमे ५२

120

नन्वकरणत्रयोदशकंकार्यंदशकंचसत्त्वादिस्वभा
वत्वेनानुभूयतेइतिसत्त्वंदुःखमोहाः करणकार्य
वर्गतादात्म्यहृन्नेयोयदिगुणरूपस्यापितादात्म्यंभजे
रन्नहिगुणरूपएवकार्यकारणपर्यन्तस्तर्हिमयः
सम्पन्नःपरिणामस्वरूपस्थितइतिस्यात्तत्रशास्त्रागु
णयोविश्वरूपस्याख्यातम् तथाचनकश्चित्स्वरूप
ईश्वरएवतस्मादप्रतिभिन्नानमय गुणस्वरू
पविचारेसत्त्वादयोभिन्नाएवेतिस्थितम् ननुज्ञा
नादीनिकथंसत्त्वादिरूपाणिपंचप्रतीत्याह ॥स
त्रानन्दःक्रियापन्नःस्तद्भावोपिसापशोः इया
न्मानद्रजोदुःखंस्मेपिसत्त्वनमोमयम् ॥इहताव
त्पतिर्विश्वस्यावभासनैवविश्वलक्षणेनस्वस्यादि
नापालयितास्वप्रकाशस्वभावस्तस्यविश्वपते
र्यासत्ताभवनकर्तृतासास्फुरत्तामहासत्तेत्यत्र से
वप्रकाशस्यविमर्शाव्यतिरेकाद्विमर्शात्मकचम
त्कारस्वरूपासतीक्रियाशक्तिरुच्यते परोन्मुखत्वा
भेनस्वात्मविश्रान्तिरूपतायांसैवानन्दः तदेवंभ
गवतश्चिदात्मनेवयद्रूपतापशोस्तत्समानतदभा
वस्यसंकुचितचिद्रूपत्वात् तेनयोसौसमानतदभा
गस्तत्प्रकाशइतिसत्वंसत्वं यस्तदभावस्तदाव

प्र. रणमोहरूपं तमः एतेन सत्त्वतमसी नीलानील
स.सि. वत् परस्परपरिहारेणाप्य यपि वर्तेते कार्यत्वकर
१२० णावत्तयाप्येकपरामर्शगोचरीकार्यधर्म्यपेतया
127 चित्रपतंगसंगतनीलनीलात्मकरूपप्रायेनाम्यो
न्यमिश्रतया भातः अतोयोयंद्वयस्यात्मामिश्रस्व
भावस्तद्रजोगुणः अतएवप्रकाशाप्रकाशयो।
स्सत्त्वतमसोरत्रश्लेषेणावस्थानमितिदुःखत्वम्
प्रियत्वादेरेकचनएवहिप्रकाशः सुखम् एक
चनएवाप्रकाशो मोहः यत्तु कथंचित्प्रकाशो
ऽप्यप्रकाशस्याधिकदेहरूपतयानभिमततयाकर्षे वि
श्वाप्रकाशी यथा गगनगदकल्याणधर्मयोगितया
भिमततया न देव दुःखम् अयमेव च सर्वोपरी।
भावसारः क्रियापरमार्थः अनुभवपरमार्थेन।
नास्ति प्रतीतेः कस्यांचिद्विकल्पिताकल्पितरूपाया
मनुप्रवेशात्तस्य तथाहि नीलं तावदकल्पितरू
पायां धियि भाति नीलाभावस्तु न क्वापि कल्पना
कल्पितो भासमानत्वाद्व्यवहारपरमार्थः न तु भ ५८
यथामिश्रणेन नीलानीलं भातं नाम यत्तु भ
यरूपं तन्नीलप्रतीत्या तावदकल्पितया न विषयी
कृतं न तु वेत्कल्पितमनीलधियमनुपावेत् अ।

© Dharmartha Trust. Digitized by eGangotri

यतोकल्पितेनोपाधिनाविशेषाकल्पिकतयाविष
यीकृते नीलमेवस्मादितिनपशोऽस्यतथोक्तिः।
णः अपिचार्थेपशोःसामान्यत्वेनतद्भावस्तमो
हयान्मारजश्चेतिसम्बन्धः एवंतावत्परिपशुरूप
प्रमात्रृतत्वंसंक्षेपेणनिर्णीतं अथप्रमेयतत्वंनि
र्णेतुंपरमेशोतावदित्थमिदंप्रमेयतत्वमितिनिर्णे
तुमाह॥ यदिसामपिकेदन्तापरामर्शभुवःप्र।
भोः नैविमिश्राविभिन्नास्तथाविज्ञावभासिनः॥
इहाभासएवतावदर्थोऽस्मत्कृतेनैवपरामर्शकेनक
दाविन्मिश्रीक्रियते यदाविशेषरूपताकदाचिदमि
श्राएवपरामृश्यन्ते यदासामान्यरूपतातयोरु
भयात्मतोऽपिसामान्यविशेषात्मनोऽर्थोस्यसाम
यिकेनाकल्पितेनेदन्त्वावेनसहजभेदपरामर्शरू
पेणांगुलिनिर्देशादिप्रख्येनगोचरीकार्याःप्रभो
रपि नकेवलंमयोजानवालादेर्यावदीश्वरस्यापि
तथाऽनेनसामान्यविशेषप्रकारेणविज्ञतयावभा
सन्ते विज्ञत्वंहितयोर्यत्मिश्रत्वममिश्रत्वंचएग
पदेकारूप्यविश्रान्तंभातीति ईश्वरदशायांभा
वोल्लासनान्तरीयकत्वेनसंवित्संकोचरूपंनिषिध्या
नुपरक्तनन्त्वर्थमात्ररूपम्पूर्यसंविन्मकापोनैवप्र।

© Dharmartha Trust. Digitized by eGangotri

प्र॰
सभि
१२८
128

काशमानमहन्तानिषेधरूपामसामयिकीमिद
न्तामुल्लासयति एवं तावदीश्वरस्वरूपस्यपञ्चरिश्र
क्रमेप्रमेये परमशिवेन भगवति प्रमेयकक्ष्येव।
कथंनुनिष्ठति प्रमेयकक्ष्याव्यापकत्वमेव भग
वतः सदाशिवेश्वरत्वप्रतोद्यतापञ्चप्रति प्रमेयस्य
कीदृग्ह्यवान्तरंति सन्देहमपोहति श्लोकद्वयेण॥
तेन भिन्नावभासार्थाः प्रकल्प्याः प्रत्यगात्मनः न।
नहि भिन्नसंताभिः स्वस्मैवतादिगोचरे तस्य।
साधारणी सृष्टिरीशस्य सृष्ट्युपजीविनी सैषाप्यत्रा
नयामस्यैवेशशक्त्यानतात्मनः॥ स्वविश्रान्त्युप
रोधायवलयाश्रयाणरूपया विकल्पक्रियया नम
हर्णेवैचित्र्यविश्रया॥ नविशेषंयोनयति प्रम
गात्मक्लिष्टप्रमेयरूपा प्रयोनन्वीश्वरवत्कृतं।
येनेति भिन्नरति भिन्नसामिश्रतया भियमानश्चा।
भासोयेषामर्थानां ते विशेषसामान्यात्मानोऽर्थाः
प्रमगात्मनः प्रतिपुरुषमस्या भिन्नस्वसंवेदना। ५५
वगमरूपस्यासंकीर्णाहंप्रकाशात्मनः प्रकल्प्या
विकल्पनीयाः प्रतिप्राणिस्ववासनानुसारेण।
विभिन्नाभिः संज्ञाभिः प्रियोयंशत्रुरयमित्यादि।
काभिर्भावनाविशेषानुसारेण न महिचित्रस्वरूप

© Dharmartha Trust. Digitized by eGangotri

ुः खाद्युपभुक्ताभिः स्मरणोऽस्येतराणां संकल्पेष्व
प्यत्रच विकल्पयोगो यत्तुक्तं भवति ईश्वरस्यवि
कल्पात्मकनामन्तरेण शुद्धविमर्शविषयीभावा
द्यर्थाः पशोस्तु मायापाहतमहेवाकिनि विकल्पे
समारूढास्ते ग्रर्था भवन्ति सांसारिकरूढानादाना
दिव्यवहारोपयोगादिति ननु विकल्पत्वे यावा
नेवार्थस्तावानेव विकल्पत्वेन को विशेषः प्र
मेयस्य पतिपशुरूपतायां उच्यते नन्वेतत्ति पशुक
र्तृकास्य सृष्टिस्तेषामर्थानामीशस्य सृष्टानामनुपरिवर्ति
नी ग्रत एवनामीश्वरस्य सृष्टिमुपजीवन्तीश्वरसाधा
रणीप्रति प्रमातृनियता न यथाऽदेशरूपमिति
येन सृष्टिं न वस्येव न तथानान्यस्य ननु यदि पशो
रपि सृष्टिशक्तिरस्ति न हीश्वर एव सर्वमीश्व
र एवास्तो न त्वेवं मायापारणात्वकस्मात्सृष्टं भवति
भवेत् यदि स्वशक्तिं परिजानीयात् यावतास्या
नस्यापरिज्ञानात्परवशस्यैव सतो विकल्पक्रिया
विकल्पनशक्तिरुदेति न शुकेन सा तत्स्योक्ताप्य
नेश्याह ईश्वरस्य परामर्शरूपतया शुद्धत्वशील
त्वात्स्या या शक्तिः स्वरूपलक्षणा पारमेश्वरीपा
रोपप्रयोजना ब्राह्म्यादिदेवताच क्रमयीतैस्तैः

© Dharmartha Trust. Digitized by eGangotri

प्र॰
म वि॰
१२९

ककारादिवर्णवैचित्र्यैर्विचित्रज्ञानयायासौविकल्प
क्रियानस्यपशोरेकत्वनिश्चयाभावाच्चञ्चलानेन
मित्रमिदंशत्रुरयमित्यादिवर्णवैचित्र्यात्तु विज्ञा
नयाविकल्पनक्रिययानतात्मानईश्वरस्वभाव
स्यैवपशोरसाधारणीसृष्टिःपेचदन्तश्चनवक्रो।
ह्लीनभक्तियावतीत्यपिविमिश्रतायांविकल्प
सृष्टिस्तानाभासानीश्वरसृष्टानेवोपजीवतीतिसर्वा
पाशवीजप्रत्ययसृष्टिरीशसृष्ट्युपजीवनीत्युक्त
म् नन्वेवंयदिपाशवीसृष्टिःसंसाररूपातर्हिपा
रमीश्वरीसृष्टिःपशोःकिंरूपादितिनिर्णीयते
साधारणोन्यथाशार्वःसर्गःस्पष्टावभासवान् वि
कल्पहानेनैकाग्र्यात्क्रमेणेश्वरतापदम्॥ ऐश्वरः
सर्गोद्विधासाधारणश्चान्यथेतिनिर्दिष्टोद्विचन्द्रा
दिः तस्यचसामान्यलक्षणंस्पष्टावभासत्वंनाम
सोयंसर्गोयदाविकल्पहानक्रमेणतस्मिन्निर्वि
कल्पकपरिग्रहीनएवस्पष्टाभेदैकप्रकाशत्वमव
लम्ब्याहमिदमित्यैश्वर्यपरामर्शपदंभवति न
तान्तर्लक्ष्योबहिर्दृष्टिर्निमेषोन्मेषपरिहारोपदे
शादिशाक्रमेणाभ्यासतारतम्येनपशोःपशुत्वं
प्रतिहन्तीश्वरत्वंचदर्शयति किंचयोयंविकल्प

© Dharmartha Trust. Digitized by eGangotri

सर्गः पाशवउक्तः सोपियद्यन्ययेति पूर्वोक्तरूप
वैपरीत्येनपरिज्ञानेपशुशास्त्रापरिज्ञातेनतदा
न्यस्यभवति नह्यसोपिसाधारणएवश्राप्याय
णाभिचरणशान्त्यादिविकल्पश्चन्यस्तमन्त्रस
भाविमान्तःकरणस्य एवंविकल्पनिर्ह्रासेननि
र्विकल्पकरूपसात्मीभावेविद्यात्ममाताक्रश।
णालक्षणःस्वप्रसयएवमोक्षोदर्शितः अधुना
विकल्पनिर्ह्रासाभावेपितंदर्शयति सोऽहंममा
येविभवश्चैवपरिजानतः विश्वात्मनोविकल्पा
नांप्रसरेपिमहेशता ॥ नहिप्रत्यगात्मानामप
शुःकश्चिदन्यःयोऽहं अपितुपरिग्रहीतग्राहक
प्रकाशघनःपरमेश्वरोयः सएवाहंसर्वाहमे
वनत्वन्यःकश्चित् अनोविकल्पस्थितिरपिमम
स्वातन्त्र्यलक्षणोविभवइति एवंविमर्शोदयेभू
तेसत्यपरिक्षीणविकल्पोपिजीवन्नेवमुक्तः य।
थोक्तंशंकापिनविशेत्तेनतन्निःशंकत्वमिदंस्फुटमि
ति ननेवंबद्धमुक्तयोःप्रमेयंप्रतिकोभेदइति ॥
मेयंसाधारणंमुक्तःस्वात्माभेदेनमन्यते महेश्व
रोयथाबद्धःपुनरत्यन्तभेदवत् ॥ श्रीमत्सदाशि
वपदादारभ्यक्षितिपर्यन्तप्रमातृवर्गोप्यपिष्ठार

© Dharmartha Trust. Digitized by eGangotri

प्र. यदहमितिरूपं तदेवात्मतयाभिनिविशतेस्तु।
म.भि. न्तः तत्स्य विश्वस्य प्रमेयं ममापि मम प्रमेयं वि
१३ श्वस्यापि प्रमेयं चेदं ममेवांगभूतं प्रमेयान्तर।
130 मपि तद्व्यत्वेनक्रमेण प्रमेयं परस्परतस्त्वप्रमा
त्वर्गाभ्यात्याहृतमिमेकरसाभेदविश्रान्तितत्त
मस्य सर्वं परामर्शपदमुपैति तदस्य तत्सर्वमे
तद्विपरीतमिमेकरसभेदविश्रान्तिरेवास्ते ननु
सदाशिवेश्वरभुवि जीवन्मुक्तपदे वस्तूपपन्नश्चप्र।
मात्रविषये च प्रमेयपदमान्तः परीत्तितः परम।
शिवे तत्कथमस्याविभाशंक्याह ।। सर्वथात्वन्तरा
लीनानन्तभुवनैर्भरः शिवश्चिदानन्दघनः प
रमात्तरविग्रहः ।। न खलु भगवति श्रीपरमशि।
वे प्रमेयकथाकाचिदस्ति तत्रैवचस्य सर्वथान्त
चिद्रूपतामात्रविश्रान्तत्वेन लीनत्वात् तत्स्य सा
वस्यासे वित्त्वभावेन स्वात्मविश्रान्त्यानन्देनाह्न।
त्रिमनैसर्गिकपरामर्शात्मकस्वात्मचमत्कार ६२
लक्षणेन प्रकच्चनाअविच्छिन्नरूपापरमात्तरे
णविग्रहवती भगवतो विश्वमयस्यानवच्छिन्ना
नुत्तरधाम्नो गलितप्रमेयकथा सर्वैरेवाप
दिश्यते एवमधिकारवत्तु हृषीकं तत्तदहत्वतस्य

© Dharmartha Trust. Digitized by eGangotri

फलमाह ॥ एवमात्मानमेतस्य सम्यग्ज्ञानक्रिये
तथा । पश्यन्यथेप्सितानर्थाञ्जानाति च करोति च
एवमिति ईश्वररूपमात्मानं तस्य च स्वाव्यतिरि
क्तस्यानस्य मात्रद्रूपं ज्ञानक्रिये जानन्नेवंभूतोयमा
त्मा न तु काणादादिदर्शितरूपं च ज्ञानक्रिये न तु त
स्वव्यतिरिक्ते केचनेति परामृषन्यदिच्छति त
ज्जानाति च करोति च समावेशाभ्यासपरो ने
नैव शरीरेण अतस्तत्परात्म सति देहे जीवन्मुक्तः ।
स्तनुपाते परमेश्वर एवेति अस्यार्थस्य स्वप्रत्ययसि
द्धस्यापि गुरुपरम्परोपदेश उपोद्बलको वक्तव्यः शा
स्त्रदृष्टिहृद्दर्शिनागमाधिकारेण एवं गुरुतः शा
स्त्रतः स्वतः एतद्दृढीकृतं भवतीत्यभिप्रायेणागुरु
पारम्पर्यं दर्शयति ॥ इति प्रकटितो मया सुघट एष
मार्गो नवो महागुरुभिरुच्यते स्म शिवदृष्टिशा
स्त्रे यथा । तदत्र निदधत्पदं भुवनकर्तृतामात्मनो वि
भाव्य शिवतामयीमनिशमाविशन्सिध्यति ॥ श्रीम
त्परमेष्ठिभट्टारकश्रीसोमानन्दपादैः शिवदृष्टिशा
स्त्रेयमभिनवः सर्वरहस्यशास्त्रान्तर्गतः सन्निरू
ढत्वात्प्रसिद्धो वाच्यान्तरचर्याप्राणायामादिक्लेश
प्रयासकलाविरहात्सुघटत्वाच्च नूतनः सएवात्र प्र

© Dharmartha Trust. Digitized by eGangotri

प्र॰ कटनांपरवादकलंकाशंकापसारणेननीतः
स भि॰ यतएवंशास्त्रगुरुस्वप्रत्ययसिद्धोयमर्थः नदि
१३१ ति तस्मादत्रप्रमेयपदंपरामर्शे विश्रमयति।
131 स्वकर्तृत्वलक्षणमैश्वर्यमात्मनोविभाव्यदार्ढ्ये
नयदिपरामृषतितत्परामर्शमात्रादेवतावज्जीव
न्मुक्तोभगवाञ्छिवएव यथोक्तंपरमेष्ठिपादैः।
सकृज्ज्ञातेस्ववर्णैकिंभावनाकारणादिना एक
वारंप्रमाणेनशास्त्राद्वागुरुवाक्यतः ज्ञातेशि
वत्वेतत्रस्यप्रतिपमारूढात्मना करणेनना।
स्तिकृत्यंकापिभावनयापिवा सर्वदापिप्रमाद्य
दितत्पदार्ढ्येन समनेमादिनोविभाव्ययति
शमाविशति शरीरप्राणबुद्धिशून्येभ्योप्यतमं
हयंपर्वंगतेश्चेवतिमज्जयत्यनवरतंततोनोवि।
भूतिंपरविभूतिपर्यन्तांलभते ननुयथास्माखे
वस्तुतदेवतर्हितस्यप्रत्यभिज्ञानाप्रत्यभिज्ञानयो
रविशेषः नहिबीजस्यप्रत्यभिज्ञानंसतिसहका
रिसाकल्येतोऽङ्कुरंजनयति तत्कथमत्रप्रत्यभिज्ञा
नेनिर्बन्धः उच्यते द्विविधाप्रर्थक्रियास्तिबाह्या ५५
बांकुरादिकाप्रमातृविश्रान्तिचमत्कारसारावभी
मादिरूपा तत्राद्यासंप्रत्यभिज्ञानेनापेक्षते।

© Dharmartha Trust. Digitized by eGangotri

द्वितीयान्ततद्रूपत्वेनैव रहस्येयमहमीश्वर
स्यैवंभूतचमत्कारसारापरापरसिद्धिलक्षणजी
वन्मुक्तिविभूतियोगमयार्थक्रियेतीश्वरप्रत्यभि
ज्ञानमात्रावशेषापेक्षणीयेतत्प्रसादविश्रान्ति
सारार्थक्रियाप्रत्यभिज्ञानेन विना न दृष्टमिति तत्र
दृष्टेति कैतदुपलब्धमित्याशंक्याह ।। तैस्तैरप्यु
पयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके कान्तो
लोकसमान एवमपरिज्ञातो न रन्तुं यथा लोक
स्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो नै
वालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ।।
यथा नायकगुणसंश्रवणप्ररूढानुरागा कामि
नी तद्दर्शनमेव परममुपादेयमाकांक्षन्ती दिवा
निशमवशस्फुरद्यादेवतोपयाचितानि हन्ती सम्प्र
षणानि मदनलेखहारकामावस्थानिवेदनानि।
चक्रवाणाविरहदत्ताभीभवज्ञाचलतिकानिष्पत्ति
नदानउपयाचितवशादर्शकिन्तमेव सविधवर्ति
निश्रियतमेवलौकिकेनैस्तैरुत्कर्षविशेषैःपराम
र्शपदवीमगाहद्भिर्जनसाधारणमामायादिनेस
मत्वमपि न क्षिप्तमावलोकनेन हृदयं स्वीक
रोति तथात्मापि विश्वेश्वरे सततं निर्भासमाने

© Dharmartha Trust. Digitized by eGangotri

प्र° प्र भि १३२ 132

पितत्त्रिभिर्भासनेन हृदयस्य पूर्णतामापन्ने यतः सो
पिस्वात्मा विश्वतत्त्वकर्तृत्वाप्रतिहतशक्तिल
क्षणपारमेश्वरोत्कर्षयोगेन न परामृष्ट इति भा
समानघटादिवन्न सत्त्वान्तोमातः ; यदातु हृ।
तीवचनाद्दानलक्षणाभिज्ञानाद्वोपायान्तराद्वा
नात्मोत्कर्षो न् हृदयंगमीकरणेनामृषति तदा
तल्लक्षणमङ्गलफलमाप्येनैवनावत्कामपि पूर्णता
मभ्येति परिभोगाभ्यासरसेन विश्रान्त्यन्तराणु
पलभते तहदात्मनि गुरुवचनाज्ज्ञानक्रियाल
क्षणशक्त्यभिज्ञानादेवीपदा परमेश्वरोत्कर्षे हृ
दयंगमीभावेनापन्ने तदानन्तलक्षणमेव पूर्णता।
त्मिकां जीवन्मुक्तिः समावेशाभ्यासरसेन विभूति
लाभश्चेति तस्य प्रत्यभिज्ञैव परापरसिद्धिप्रदायि।
नी भवति सर्वोपकारकं महाफलमिदं शास्त्रम्।
सिद्धान्वययोगेन नामधेयप्रसिद्ध्यावतन्मदुत्कर्ष
स्मरणाद्धारजनितसम्भावना प्रत्ययलक्षणप्रव
र्तकसंवेदनयाजनं प्रवर्तयितं पितत्त्वनाम्नात्मना
त्मावोपसंहारं दर्शयति ॥ जनस्याप्ययत्नसिद्धयेमु
दपाकरस्मत्सुता ईश्वरप्रत्यभिज्ञेयमुत्पलेनोप
पादिता ॥ यस्य कस्यचिज्जन्तोरितिनाथजामायापे

© Dharmartha Trust. Digitized by eGangotri

त्ताकाविदिति सर्वोपकारित्वमुक्तमिति श्रय
त्वेनसिद्धिः परापरमूपायस्य स्यादितिमहाफलत्व
मुक्तं उदयाकरस्य पुत्रः श्रीमानुत्पलदेवोऽस्मत्प
रमगुरुः विदेशास्त्रमकार्षीदिति तत्त्वसिद्धाजनः
प्रवर्तते इति प्रवर्तनाद्वारेण सोऽनुग्रहीतो भवती
त्यभयनामनिर्देशः इयमितिहृदयंगमनामु
पपत्तिशतैरानीतेतिशिवम् १८ आदितः १९२
इति श्रीमदाचार्याभिनवगुप्तविरचितायां प्रत्य
भिज्ञासूत्रविमर्शिन्यां तत्त्वार्थसंग्रहाधिकारे प्र
थममाह्निकम् आदितः १५ समाप्तोयं तत्त्वा
र्थसंग्रहाधिकारश्चतुर्थः ॥ एषाभिनवगुप्ते
न सूत्रार्थप्रविमर्शिनी रचिता प्रतिभिज्ञायां
लघ्वीवृत्तिरभंगुरा ॥ वाक्यप्रमाणपदतत्त्वस
दागमार्थाः स्वात्मोपयोगमुपयान्तिमतः स्वशा
स्त्रात् भोमात्रमात्मजलम[illegible]स्य नमस्य पुष्टेस्तका
र्कमेकमिहयोजयितेत्र समर्थः आत्मानमत्रभि
ताय विकल्पयोमदिच्छति तेनभोनेन किं वाक्यं
प्रत्येक्षिम्को भवानिति समाप्तेयं प्रत्यभिज्ञासू
त्रार्थविमर्शिनी वृत्तिः ॥

© Dharmartha Trust. Digitized by eGangotri

व
प्रभ
१३३
133

वेदान्त

© Dharmartha Trust. Digitized by eGangotri